चतुर्थः पाठः

नीतिश्लोकाः

(नीतिश्लोकेषु नीतिः भवति। जीवनविषये, समाजविषये, राष्ट्रविषये धर्म-वैराग्य-संस्कार परोपकारादिविषये प्रामाणिकं, सुचिन्तितं वैज्ञानिकं च चिन्तनं नीतिश्लोकेषु लभ्यते। संस्कृते नीतिम् आश्रित्य श्लोकरचनायाः शतकरचनायाः च परम्परा अतिप्राचीना विद्यते। वस्तुतः अल्पैः शब्दैः महनीयभावानाम् उदात्तविचाराणां श्रेष्ठविषयाणां च महत्त्वपूर्णं विवरणं नीतिश्लोकेषु लभ्यते।)

अर्थागमोनित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन्॥ 1॥

अयुक्तं स्वामिनो युक्तं युक्तं नीचस्य दूषणम्।
अमृतं राहवे मृत्युः विषं शङ्करभूषणम्॥ 2॥

अमृतं चैव मृत्युश्च द्वयं देहे प्रतिष्ठितम्।
मृत्युमापद्यते मोहात् सत्येनापद्यतेऽमृतम् ॥ 3॥

आपत्सु मित्रं जानीयाद् युद्धे शूरं धने शुचिम्॥
भार्यां क्षीणेषु वित्तेषु व्यसनेषु च बान्धवान्॥ 4॥

आरोप्यते शिला शैले यत्नेन महता यथा।
निपात्यते क्षणेनाधः तथात्मा गुणदोषयोः॥ 5॥

उद्योगे नास्ति दारिद्र्यं जपतो नास्ति पातकम्।
मौने च कलहो नास्ति नास्ति जागरिते भयम्॥ 6॥

किं छिद्रं को नु सङ्गो मे किं वास्त्यविनिपातितम्
कुतो ममाश्रयेद् दोषः इति नित्यं विचिन्तयेत्॥ 7॥

गुणेषु क्रियतां यत्नः किमाटोपैः प्रयोजनम्।
विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः॥ 8॥

निर्धनस्य विषं भोगो निस्सत्त्वस्य विषं रणम्।
अनभ्यासे विषं शास्त्रम् अजीर्णे भोजनं विषम् ॥ 9॥

शब्दार्थाः

अर्थागमः — धन का आगम
अरोगिता — निरोगता
वश्यः — आज्ञापालक
अर्थकरी — धन संग्रह कराने वाली
अयुक्तम् — अनुचित, अयोग्य
स्वामिनः — समर्थ जन का
युक्तम् — उचित वस्तु या उपयोगी वस्तु
अमृतम् — अमृत, अमरता
मृत्युमापद्यते — मृत्यु को पाता है
आपत्सु — आपत्तियों में
व्यसनेषु — बुरी आदतों में
जानीयात् — जानना चाहिए
आरोप्यते — चढ़ाई जाती है
निपात्यते — गिराई जाती है
तथात्मा — वैसे ही प्राणी, व्यक्ति
अधः — नीचे
उद्योगे — उद्यम करने पर
दारिद्र्यम् — गरीबी
जपतः — भगवान् का नाम लेने वाले का
कलहः — लड़ाई-झगड़ा
छिद्रम् — दुर्बलता, गलती, बुराई
सङ्गः — आसक्ति
अविनिपातितम् — वह कौन सी वस्तु जो पतनशील नहीं है
ममाश्रयेत् — मुझ में आते हैं
विचिन्तयेत् — चिन्तन करना चाहिए
गुणेषु — गुण के उपार्जन में
किमाटोपैः — बाहरी आडम्बरों से क्या?
घण्टाभिः — घण्टे लटकाने से
क्षीरविवर्जिताः — दूध से रहित
भोगः — भोग-विलास
निस्सत्वस्य — अशक्त के लिए
अनभ्यासे — अभ्यास न करने पर
अजीर्णे — अपच में

अभ्यासः

1. **एकपदेन उत्तरं लिखत—**

क. भार्या कीदृशी भवेत्?
ख. विद्या कीदृशी भवेत्?
ग. युक्तं नीचस्य किं भवति?
घ. मनुष्यः मृत्युं कथम् आपद्यते?
ङ. मित्रं कदा जानीयात्?

2. **एकवाक्येन उत्तरं लिखत—**

क. अजीर्णे विषं किम्?

ख. दारिद्र्यं कुत्र नास्ति?

ग. मानवः नित्यं किं विचिन्तयेत्?

घ. गुणेषु कः करणीयः?

ङ. अनभ्यासे किं विषम्?

3. **श्लोकांशान् यथायोग्यं योजयत—**

	(अ)	(ब)
क.	मृत्युमापद्यते मोहात्	विषं शङ्करभूषणम्
ख.	गुणेषु क्रियतां यत्नः	सत्येनापद्यतेऽमृतम्
ग.	अनभ्यासे विषं शास्त्रम्	जपतो नास्ति पातकम्
घ.	अमृतं राहवे मृत्युः	किमाटोपैः प्रयोजनम्
ङ.	उद्योगे नास्ति दारिद्र्यं	अजीर्णे भोजनं विषम्

4. **शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत—**

क. नित्यम् अर्थागमः अरोगिता च इति द्वयं भवेत्। [ ]

ख. अमृतं विषं च द्वयं देहे प्रतिष्ठितम्। [ ]

ग. उद्योगे दारिद्र्यम् अस्ति। [ ]

घ. व्यसनेषु बान्धवान् जानीयात्। [ ]

ङ. सत्येन अमृतम् आपद्यते। [ ]

5. पदानां विभक्तिं वचनं च लिखत—

	पदम्	शब्दः	विभक्तिः	वचनम्
क.	नीचस्य	नीचः	षष्ठी	एकवचनम्
ख.	आपत्सु	....	....	....
ग.	युद्धे	....	....	....
घ.	क्षीणेषु	....	....	....
ङ	धने	....	....	....
च.	गुणदोषयोः	....	....	....
छ.	निर्धनस्य	....	....	....
ज.	मौने	....	....	....
झ.	व्यसनेषु	....	....	....
ञ.	बान्धवान्	....	....	....

योग्यताविस्तारः —

- अन्यौ कौ अपि द्वौ नीतिश्लोकौ लिखत जानत च।

नयेन जेतुं जगती सुयोधनः।